# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - मार्च्-एप्रिल् २०१९

**कक्षा**-शास्त्री-१ (SEM-2) **प्रश्नपत्रम्** - ५ (Old & New) **गुणा:** - ७०

**विषय:** - वास्तुशास्त्रम् **कोड- CC- 123** **समय:** - ११ त: २

**दिनाङ्क:** - १५/०४/२०१९ **सन्दर्भग्रन्थ:**-वास्तुतत्त्वविवेक:

---

॥ **प्रथमान्विति:** ॥ (Unit-1)

**प्रश्न: १ अधोलिखितेषु त्रिषु कयोश्चिद् द्वयो: व्याख्यां कुरुत ।** १०

१ देया सिंहजगध्वजा हि वृषभे सिंहध्वजौ कुञ्जरे
सिंहे वै ध्वज इष्यते च वृषभोऽन्यत्रापि देयो बुधै: ।
सिंहो हस्तिवृषालये मृतिकरस्त्वायस्थवक्त्रं गृहं
तस्मिन्नेव च वामदक्षिणदिशाद्वारे स आय: शुभ: ॥

२ अष्टोत्तरं हस्तशतं विस्तारं नृपमन्दिरम् । कार्यप्रधानमन्यानि तथाष्टाष्टौ चोनितेषु ॥

३ शुक्लमृत्स्ना च मा भूमिर्ब्राह्मणी सा प्रकीर्तिता । क्षत्रिया स्लमृत्स्ना च हरिद्वैश्या प्रकीर्तिता ॥
ब्राह्मणी भू: कुशोपेता क्षत्रिया शरसंकुला । शुककाशाऽऽकुला वैश्या शूद्रा सर्वतृणाकुला ॥

**प्रश्न: २ अधोलिखितयो: कस्यचित् एकस्य उपरि निबन्धं लिखन्तु ।** १०

१ भूमिपरीक्षा ।

२ गृहस्य मुख्यद्वारनिर्णय: ।

॥ **द्वितीयान्विति:** ॥ (Unit-2)

**प्रश्न: ३ अधोलिखितेषु त्रिषु कयोश्चिद् द्वयो: व्याख्यां कुरुत ।** १०

१ पूर्वे वहति शुभं किञ्चिदग्निकोणे धनक्षयम् । दक्षिणे प्राणसन्देहो नैर्ऋते प्राणघातक: ॥
पश्चिमे पुत्रनाशाय वायव्ये सुखमेव च । उत्तरे राजसम्मानम् ईशाने सुखसम्पद: ॥

२ शाक: शालमधूकसर्जखदिरा रक्तासना: शोभना
एकोऽसौ सरलोऽर्जुनस्य पनस: श्रीपर्णिनी शिंशपा: ।
हारिद्रस्त्वपि चन्दन: सुरतरू पद्माक्षकस्तिन्दुकी
नैतेऽन्येन युता भवन्ति फलदा: शाकादय: शोभना: ॥

३ व्यासे बुद्ध्यंशेंऽशकं पार्श्वयोस्तं बाह्ये न्यस्यानेन मानेन दध्यात् ।
मत्स्यं कृत्वा युग्मयुग्मं द्विपार्श्वात् षट्कोणं स्यात्पातयेत्सूत्रषट्कम् ॥

**प्रश्न: ४ अधोलिखितयो: कस्यचित् एकस्य उपरि निबन्धं लिखन्तु ।** १०

१ योनिकुण्डम् ।

२ प्रतिमाया: विशेषलक्षणं तथा विष्णुप्रतिमास्वरूपम् ।

॥ **तृतीयान्विति:** ॥ (Unit-3)

**प्रश्न: ५ अधोलिखितेषु त्रिषु कयोश्चिद् द्वयो: व्याख्यां कुरुत ।** १०

१ अश्वत्थमेकं पिचुमन्दमेकं न्यग्रोधमेकं दश चिञ्चिणीका: ।
कपित्थबिल्वामलकत्रयं च पञ्चाम्रवापो नरकं न पश्येत् ॥

२ पार्वती बिल्ववृक्षस्थां लक्ष्म्यौ च तुलसीगतम् । आदौ सर्वं वृक्षमयं पूर्वं विश्वमजायत ॥

३ पूजितोऽसि मया वास्तो होमाद्यैरर्चनै: शुभै: । प्रसीद पाहि विश्वेश देहि मे गृहजं सुखम् ॥

**प्रश्नः ६ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखन्तु । १०**

१ बह्वट्ट(बहुमंजिल)भवनेषु वास्तुनियमाः ।

२ विना त्रोटनस्फोटनं (तोडफोड) वास्तुदोषनिवारणम् ।

**प्रश्नः ७ दशप्रश्नानाम् अतिलघूत्तराणि यच्छत । १०**

१ गृहनिर्माणार्थं भूखण्डः कथं भवेत्?

२ वास्तुभूमौ रिक्तस्थानं कुत्र भवति?

३ वास्तुभूमौ देवगृहं कुत्र कस्मिन् कोणे च भवति?

४ ब्राह्मणीभूलक्षणं किम्?

५ वामसूर्यः कदा भवति?

६ वामसूर्यस्य फलं किम्?

७ चन्द्रविद्धाङ्गणं शुभम् अशुभं वा?

८ सोपानं (सीढी) दक्षिणावर्तं वामावर्तं वा शुभं भवति?

९ पूर्वदिशायां जलस्थानं शुभम् अशुभं वा?

१० शेषनागस्य स्थापना कस्मिन् मासे कर्तव्या?

११ वास्तोर्मध्ये जलस्थान-(कूप-नल)स्य फलं किम्?

१२ पूर्णापूजनमन्त्रं लिखतु ।

१३ 'देहली'शब्दस्य कोऽर्थः?

१४ पूजितोऽसि मया वास्तो होमाद्यैरर्चनैः शुभैः अस्य श्लोकस्य द्वितीयचरणं लिखतु ।

१५ चिञ्चिणीशब्दस्य अपरं नाम किम्?

००० 